# M.A. 2nd Semester Examination, 2023

## SANSKRIT

PAPER – SAN-203 (Day & CCAE)

*Full Marks* : 40

*Time* : 2 hours

*The figures in the right hand margin indicate marks*

*Candidates are required to give their answers in their own words as far as practicable*

*Illustrate the answers wherever necessary*

(सर्वे प्रश्नाः संस्कृतभाषया देवनागरीलिप्या च समाधेयाः )

**1.** यथानिर्देशमुत्तरं दीयताम् — 10 × 2

(*a*) 'नैषधे पदलालित्यम्' — उक्तेरस्याः सार्थक्यं सप्रमाणं सम्यक् सम्पाद्यताम् ।

*अथवा*

दमयन्तयाः नलं प्रति कीदृशः पूर्वरागः आसीत् तद् प्रथम-सर्गमाश्रित्य प्रस्तूयताम् ।

(*b*) 'खण्डकाव्यं भवेत्काव्यस्यैकदेशानुसारि यत्' — इति विचार्यताम् ।

*अथवा*

'अप्यन्यस्मिञ्जलधर महाकालमासाद्य काले स्थातव्यम् — अनेन पद्यांशेन सम्बद्धः नगरविशेषः कः मेघदूतमनुसृत्य तस्याः नगर्याः सौन्दर्यं चारुतयोपवर्ण्यताम् ।

2. यथेच्छं द्वयोः व्याख्या कार्या — $5 \times 2$

(*a*) अमुष्य विद्या रसनाग्रनर्त्तकी
त्रयीव नीताङ्गगुणेन विस्तरम् ।
अगाहताष्टादशतां जिगीषया
नवद्वयद्वीपपृथग्जयश्रियाम् ।

(*b*) यदस्य यात्रासु बलोद्धतं रजः
स्फुरत्प्रतापानलधूममञ्जिमा ।
तदेव गत्वा पतितं सुधाम्बुधौ
दधाति पङ्कीभवदङ्कतां विधौ ।

(*c*) अयं दरिद्रो भवितेति वैधसीं
लिपिं ललाटेऽर्थिजनस्य जाग्रतीम् ।
मृषा न चक्रेऽल्पितकल्पपादपः
प्रणीय दारिद्र्यदरिद्रतां नृपः ॥

**3.** यथेच्छं द्वयोः व्याख्या कार्या — 5 × 2

(*a*) जातं वंशे भुवनविदिते पुष्करावर्तकानां
जानामि त्वां प्रकृतिपुरुषं कामरूपं मघोनः ।
तेनार्थित्वं त्वयि विधिवशाद् दूरबन्धुर्गतोऽहं
याच्ञा मोघा वरमधिगुणे नाधमे लब्धकामा ॥

(*b*) त्वामासारप्रशमितवनोपप्लवं साधु मूर्ध्ना
वक्ष्यत्यध्वश्रमपरिगतं सानुमानाम्रकूटः ।
न क्षुद्रोऽपि प्रथमसुकृतापेक्षया संश्रयाय
प्राप्ते मित्रे भवति विमुखः किं पुनर्यस्तथोच्चैः ॥

(*c*) विद्युत्वन्तं ललितवनिताः सेन्द्रचाप सचित्राः
संगीताय प्रहतमुरजाः स्निग्धगम्भीरघोषम् ।
अन्तस्तोयं मणिमयभुवस्तुङ्गमभ्रंलिहाग्राः
प्रासादास्त्वां तुलयितुमलं यत्र तैस्तैर्विशेषैः ॥

---